# শ্রীমন্ত্ররাজপদস্তোত্রম্

{॥ শ্রীমন্ত্ররাজপদস্তোত্রম্ ॥}

পাঞ্চরাত্র আগমীয় অহির্বুধ্ন্য সংহিতাত্

শ্রী মন্ত্র রাজ পদ স্তোত্রম্

শ্রী ঈশ্বর উবাচ -

বৃত্তোৎফুল্লবিশালাক্ষং বিপক্ষক্ষযদীক্ষিতম্ ।

নিনাদত্রস্তবিশ্বাণ্ডং বিষ্ণুমুগ্রং নমাম্যহম্ ॥ ১॥

সর্বৈরবধ্যতাং প্রাপ্তং সবলৌঘং দিতেঃ সুতম্ ।

নখাগ্রৈঃ শকলীচক্রে যস্তং বীরং নমাম্যহম্ ॥ ২॥

পদাবষ্টব্ধপাতালং মূর্ধাবিষ্টত্রিবিষ্টপম্ ।

ভুজপ্রবিষ্টাষ্টদিশং মহাবিষ্ণুং নমাম্যহম্ ॥ ৩॥

জ্যোতীংষ্যর্কেন্দুনক্ষত্রজ্বলনাদীন্যনুক্রমাত্ ।

জ্বলন্তি তেজসা যস্য তং জ্বলন্তং নমাম্যহম্ ॥ ৪॥

সর্বেন্দ্রিয়ৈরপি বিনা সর্বং সর্বত্র সর্বদা ।

যো জানাতি নমাম্যাদ্যং তমহং সর্বতোমুখম্ ॥ ৫॥

নরবত্ সিংহবচ্চৈব যস্য রূপং মহাত্মনঃ ।

মহাসটং মহাদংষ্ট্রং তং নৃসিংহং নমাম্যহম্ ॥ ৬॥

যন্নামস্মরণাদ্ ভীতাঃ ভূতবেতালরাক্ষসাঃ ।

রোগাদ্যাশ্চ প্রণশ্যন্তি ভীষণং তং নমাম্যহম্ ॥ ৭॥

সর্বোঽপি যং সমাশ্রিত্য সকলং ভদ্রমশ্নুতে ।

শ্রিয়া চ ভদ্রয়া জুষ্টো যস্তং ভদ্রং নমাম্যহম্ ॥ ৮॥

সাক্ষাত্ স্বকালে সম্প্রাপ্তং মৃত্যুং শত্রুগণান্বিতম্ ।

ভক্তানাং নাশযেদ্ যস্তু মৃত্যুমৃত্যুং নমাম্যহম্ ॥ ৯॥

নমস্কারাত্মকং যস্মৈ বিধাযাঽঽত্মনিবেদনম্ ।

ত্যক্তদুঃখোঽকিলান্ কামান্ অশ্নন্তং তং নমাম্যহম্ ॥ ১০॥

দাসভূতাঃ স্বতঃ সর্বে হ্যাত্মানঃ পরমাত্মনঃ ।

অতোঽহমপি তে দাসঃ ইতি মত্বা নমাম্যহম্ ॥ ১১॥

ফলশ্রুতিঃ

শঙ্করেণাদরাত্ প্রোক্তং পদানাং তত্ত্বনির্ণযম্ ।

ত্রিসন্ধ্যং যঃ পঠেত্ তস্য শ্রীর্বিদ্যাঽঽযুশ্চ বর্ধতে ॥

Encoded by Vijayaraghavan Bashyam

Please send corrections to sanskrit@cheerful.com

Last updated ৺oday

http://sanskritdocuments.org

Mantrarajapada Stotram Lyrics in Bengali PDF
% File name : padastotram.itx
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Vijayaraghavan Bashyam
% Proofread by : Vijayaraghavan Bashyam
% Latest update : January 21, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website